M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.
Ser. V/22

Title: Tarka Sangraha

V/22

In Complete

Tarka Sangraha	: Title	
Annam Bhatta	: Author	
	: Editor	
	: Year, Vols.	
810	: Publisher	
V/22 Presented by Prof. V. R. Trivedi	: Remarks	

तर्कसंग्रह

श्रीगणाधिपतये नमः॥ॐ॥ निधाय हृदि विश्वेशं विधाय गुरुवंदनं॥ बालानां सुखबोधा[illegible] क्रियते तर्कसं
ग्रहः॥१ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः सप्तैव पदार्थाः॥ तत्र द्र[illegible]पृथ्व्यप्तेजो
वाय्वाकाशकालदिगात्ममनांसि नवैव॥ रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा
परत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः॥ उ
त्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचकर्माणि॥ परमपरं चेति द्विविधं सामान्यं॥ नित्यद्र
व्यवृत्तयो विशेषास्त्वनंता एव॥ समवायस्त्वेक एव॥ अभावश्चतुर्विधः॥ प्रागभावः प्रध्वंसा
भावोऽत्यंताभावोऽन्योन्याभावश्चेति॥ गंधवती पृथ्वी॥ सा द्विविधा॥ नित्या चानित्या च॥ नित्या ॥१॥ श्रीशिवो जय[illegible]
परमाणुरूपा॥ अनित्या कार्यरूपा॥ पुनस्त्रिविधा॥ शरीरेंद्रियविषयभेदात्॥ शरीरमस्म

दादीनां। इंद्रियं गंधग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादि। शीतस्पर्शवत्य आपः। ताश्च द्वि
विधाः नित्याश्चानित्याश्च। नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः। पुनस्त्रिविधाः शरीरेंद्रियवि
षयभेदात्। शरीरं वरुणलोके। इंद्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः सरित्समुद्रादि। उष्ण
स्पर्शवत्तेजः। तच्च द्विविधं नित्यं चानित्यं च। नित्यं परमाणुरूपं। अनित्यं कार्यरूपं। पुनस्त्रिविधं।
शरीरेंद्रियविषयभेदात्। शरीरमादित्यलोके। इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतु
र्विधः। भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादि। अबिंधनं दिव्यं विद्युदादि। भुक्तान्नपरिणामहेतु
रौदर्यं। आकरजं सुवर्णादि। रूपरहितः स्पर्शवान् वायुः। स द्विविधः। नित्यश्चानित्यश्च। नित्यः पर
माणुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेंद्रियविषयभेदात्। शरीरं वायुलोके। इं
द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरव्यापि। विषयो वृक्षादिकंपनहेतुः। शरीरांतःसंचारी वायुः
प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते। शब्दगुणमाकाशं। तच्चैकं विभु नि

तंच। अतीतादिव्यवहारहेतुःकालः सचैकोनित्योविभुश्च। प्राच्यादिव्यवहारहेतुर्दिक्। साचैका
नित्याविभ्वीच। ज्ञानाधिकरणमात्मा। सद्विविधः। परमात्माजीवात्माचेति। तत्रेश्वरःसर्वज्ञःपरमा
त्माएकएव। जीवात्माप्रतिशरीरंभिन्नोविभुर्नित्यश्च। सुखाद्युपलब्धिसाधनमिंद्रियंमनः।
तच्चप्रत्यात्मनियतत्वादनेकं। परमाणुरूपंनित्यंच। चक्षुर्मात्रग्राह्योगुणोरूपं। तच्चशुक्लनील
पीतरक्तहरितकपिशचित्रभेदात्सप्तविधं। पृथ्वीजलतेजोवृत्ति। तत्रपृथिव्यांसप्तविधं। अभास्व
रंशुक्लंजले। भास्वरंशुक्लंतेजसि। रसनग्राह्योगुणोरसः। सचमधुराम्ललवणकटुकषायतिक्तभे
दात्षड्विधः। पृथिवीजलवृत्तिः। तत्रपृथिव्यांषड्विधः। जलेमधुरएव। घ्राणग्राह्योगुणोगंधः। सुर
भिरसुरभिश्च। पृथिवीमात्रवृत्तिः। त्वगिंद्रियमात्रग्राह्योगुणःस्पर्शः। सत्रिविधः। शीतोष्णानुष्णा
शीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्रशीतोजले। उष्णस्तेजसि। अनुष्णाशीतःपृथि
वीवाय्वोः। रूपादिचतुष्टयंपृथिव्यांपाकजमनित्यं। अन्यत्रापाकजंनित्यंचानित्यंच। नित्यगतं ॥२॥ श्रीशिव

त्वकारणं। यथातुरीवेमादिकंपटस्य। तदेतत्त्रिविधकारणमध्येयदसाधारणंकारणंतदेवकरणं।
तत्रप्रत्यक्षज्ञानकरणंप्रत्यक्षं। इंद्रियार्थसन्निकर्षजंज्ञानंप्रत्यक्षं। तद्द्विविधं। निर्विकल्पकंसवि
कल्पकंच। निष्प्रकारकंनिर्विकल्पकं। सप्रकारकंसविकल्पकं। यथाडित्थोयमिति। प्रत्यक्ष
ज्ञानहेतुरिंद्रियार्थसन्निकर्षःषड्विधः। संयोगः संयुक्तसमवायः। संयुक्तसमवेतसमवायः। स
मवायः। समवेतसमवायोविशेषणताचेति। चक्षुषाघटप्रत्यक्षजननेसंयोगःसन्निकर्षः। घ
टरूपप्रत्यक्षजननेसंयुक्तसमवायःसन्निकर्षः। चक्षुःसंयुक्तेघटेरूपस्यसमवायात्। रू
पत्वसामान्यप्रत्यक्षेसंयुक्तसमवेतसमवायःसन्निकर्षः। चक्षुःसंयुक्तेघटेरूपंसमवेतंतत्र
रूपत्वस्यसमवायात्। श्रोत्रेणशब्दसाक्षात्कारेसमवायःसन्निकर्षः। कर्णविवरवर्त्याका
शस्यश्रोत्रत्वात्शब्दस्याकाशविशेषगुणत्वात्गुणगुणिनोश्चसमवायात्। श्रोत्रेणशब्दत्वसाक्षा
त्कारेसमवेतसमवायःसन्निकर्षः। श्रोत्रसमवेतेशब्दत्वस्यसमवायात्। अभावप्रत्यक्षेवि
शब्दे

तर्कसं० मूल

शेषणविशेष्यभावः सन्निकर्षः। घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य
विशेषणत्वात्। एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिंद्रियं। तस्मादिंद्रियं प्रत्यक्षप्र
माणमिति सिद्धं। अनुमितिकरणं अनुमानं। परामर्षजन्यं ज्ञानं अनुमितिः। व्याप्तिविशिष्ट
पक्षधर्मताज्ञानं परामर्षः। यथा वह्निव्याप्यधूमवानयं पर्वत इति। तज्जन्यं पर्वतो वह्नि
मानिति ज्ञानमनुमितिः। यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। व्याप्यस्य
पर्वतादिवृत्तित्वं पक्षधर्मता। अनुमानं द्विधा। स्वार्थं परार्थं च। स्वार्थं स्वानुमिति
हेतुः। तथा हि। स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं
गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति य
त्र धूमस्तत्राग्निरिति। तदनंतरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिंगपरामर्श ॥४॥ श्रीशिव
इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानमुत्पद्यते। तत्स्वार्थानुमानं। यत्तु स्वयमेव धूमाद

आश्रयासिद्धाद्यन्यतमोऽसिद्धः १ पक्षेऽपक्षतावच्छेदकस्याभावः २ पक्षे व्याप्यत्वा म तस्याभावः ४

सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दवत्। शब्दोऽनित्यः कार्यत्वाद्घटवत्। असिद्धस्त्रिधा। आ
श्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। तत्राश्रयासिद्धो यथा। गगनारविंदं सुरभि अर
विंदत्वात्सरोजारविंदवत्। अत्र गगनारविंदमाश्रयः स च नास्त्येव। स्वरूपासिद्धो यथा। शब्दो गुणश्चा
क्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्तीति। शब्दस्य श्रावणत्वात्। सोपाधिको व्याप्यत्वासिद्धः। साध्य
क॰५ व्यापकत्वे सति साधनाव्यापक उपाधिः। यथा पर्वतो धूमवान् वह्निमत्त्वादित्यत्रार्द्रेंधनसंयोग
उपाधिस्तथा हि। यत्र धूमस्तत्रार्द्रेंधनसंयोग इति साध्यव्यापकता। यत्र वह्निस्तत्रार्द्रेंधन
संयोगो नास्ति अयोगोलके आर्द्रेंधनाभावात्। इति साधनाव्यापकता। एवं साध्यव्यापकत्वे
सति साधनाव्यापकत्वादार्द्रेंधनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासि
द्धं। यस्य साध्याभावः प्रमाणेन निश्चितः स बाधितः। यथा वह्निरनुष्णः द्रव्यत्वादिति। अत्रा
नुष्णत्वं साध्यं। तदभाव उष्णत्वं तत्प्रत्यक्षेण गृह्यत इति बाधितत्वं। व्याख्यातमनुमानं। उप

त॰ दी॰ सं॰ ——
तर्क॰सं॰ मूल

मितिकरणमुपमानं। संज्ञासंज्ञिसंबंधज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानं। तथाहि। कश्चि
द्गवयशब्दार्थमजानन् कुश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वा
क्यार्थं स्मरन् गोसदृशं पिंडं पश्यति तदनंतरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते। आ
प्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेत्यादि। शक्तं पदं। अ
स्मात्पदादयमर्थो बोद्धव्य इति ईश्वरसंकेतः शक्तिः। आकांक्षादिकं च वाक्यार्थज्ञानहेतुः। पद
स्य पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा। अर्थाबाधो योग्यता। पदानामवि
लंबेनोच्चारणं सन्निधिः। आकांक्षारहितं वाक्यं अप्रमाणं। यथा गौरश्वः पुरुषो हस्तीति न प्र
माणं। आकांक्षाविरहात्। अग्निना सिंचेदिति न प्रमाणं। योग्यताविरहात्। प्रहरे प्रहरे स
होच्चारितानि गामानयेत्यादिपदानि न प्रमाणं। सांनिध्याभावात्। तद्वाक्यं द्विविधं। वैदिकं ॥ ६ ॥ श्रीशिव
लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणं। लौकिकं त्वाप्तोक्तं प्रमाणमन्यदप्रमाणं।